# MukhyaprAna Ashtakam

# मुख्यप्राणाष्टकम्

## Document Information

Text title : Mukhyaprana Ashtakam

File name : mukhyaprANAShTakam.itx

Category : vishhnu, vAdirAja, vishnu, aShTaka

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Mrs Sornavalli, Revathy R.

Latest update : May 26, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 26, 2024

*sanskritdocuments.org*

MukhyaprAna Ashtakam

# मुख्यप्राणाष्टकम्

भक्तिं श्रीरमणस्य पादयुगले प्रीत्या प्रदेहीश
मच्चितं तत्पादपद्मचिन्तनरतं नित्यं विधेह्यच्युतम् ।
त्वत्तातं मयि सुप्रसन्नमधुना विज्ञाप्य कुर्वञ्जसा
स्वामिन्प्राणगणाधिनाथ दयया दासं हि मां पालय ॥ १॥

त्वय्युत्तिष्ठति यत्कलेवरमभूत्पातैकपात्रं सुरा-
स्त्रातुं नैव हि शेकुरादिपुरुषोऽप्यासीदुपेक्षारतः ।
श्वासाख्यं मनुमस्य यत्तव वशं ब्रूतेऽविगीता श्रुतिः
सत्वं प्राणगणाधिनाथ दयया दासं हि मां पालय ॥ २॥

येनाऽऽत्मीयजिनावनाय बलिना नीतः पुरोच्चाचल-
स्तीर्णः पूर्णपयोनिधिः खलहृता दृष्टा च सीताकृतिः ।
तत्ते किं कथनीयमस्ति जगति व्यक्तस्य सत्पालने
स्वामिन्रामपदाब्जभृङ्ग तदव श्रीमन्हनूमन्नमः ॥ ३॥

सेवाभिः परितुष्टधीः कविजनैर्गेयाभिराद्यः पुमान्
ब्रह्माणं किल भाविनं समतनोत्सन्तं भवन्तं प्रभुः ।
साम्राज्ये सति विस्मृतिर्निजजने निन्द्या हि यत्वादृशां
स्वामिन्रामपदाब्जभृङ्ग तदव श्रीमन्हनूमन्नमः ॥ ४॥

कामी येन हि कीचको विनिहतः क्रोधी च दुःशासनः
स्तब्धो लुब्धसुयोधनश्च मणिमान्मुग्धो मदान्धो बकः ।
कृष्णेर्ष्याभिरतश्च मागधपतिः षड्वैरिवर्गात्सदा
स त्वं भीम गुणाभिराम दयया दासं हि मामुद्धर ॥ ५॥

दाहाद्येन विमोचितो निजजनस्य त्वं भवाग्नेरव
स्वीयाध्वप्रतिबन्धकश्च निहतः किर्मीरनामा रणे ।
प्रोद्यन्मध्वमताध्वगस्य सदय प्रत्यर्थिनस्सादय
स्वामिन्सोमकुलाग्रगण्य भवतः पोतं हि मां न त्यज ॥ ६॥

विद्वत्सिन्धम(गृ)होदय द्विजपथप्रज्ञप्तिबीजोदय
प्रत्यर्थ्यम्बुजमुद्रण प्रियजनप्रत्यूहघर्मार्दन ।
हृल्लग्नामलकृष्णसस्मितदयावीक्षासुधाधिष्ण्य मां
श्रीमन्मध्वमुनीन्द्रचन्द्रकुमुदस्थानीयमुद्बोधय ॥ ७॥

यद्वागाख्यकराः सतां सुखकराः दुर्वादिगर्वज्वराः
सद्विद्याम्बुधिपोषको यदुदयोऽविद्याम्बुधेः शोषकः ।
यः शर्वेण शिरोधृतोऽपि विशदं चक्रे मुरारेः पदं
सोऽव्याद्द्भुतमध्वतारकपतिर्हार्दान्धकारच्युतिः ॥ ८॥

पद्यानामिदमष्टकं प्रविलसन्मध्वाकृतिस्पष्टकं
तद्दासप्रियवादिराजयतिना तद्दत्तवाग्भूतिना ।
हृद्यं यः पठतीरितं सुचरितं सः स्याद्दिशामष्टके
माद्यन्मायिमतङ्गभङ्गकरणे सिंहप्रबर्हप्रभः ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं
मुख्यप्राणाष्टकं सम्पूर्णम् ।

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु ।

Proofread by Mrs Sornavalli

*MukhyaprAna Ashtakam*

pdf was typeset on May 26, 2024

Please send corrections to *sanskrit@cheerful.com*